गुन्द्र, इ क कुन्द्रे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) पञ्चमस्वरी। दन्त्यवर्गतृतीयोपधः। कुन्द्रो मिथ्योक्तिः। इ क, गुन्द्रयति नीचः मिथ्या वदतीत्यर्थः। गुन्द्र इत्यनेनैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

गुध, ग रुषि। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) ग, गुध्नाति। जुगोध। इति दुर्गादासः॥

गुध, ङ क्रीड़े। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ङ, गोधते। इति दुर्गादासः॥

गुध, य वेष्टे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) य, गुध्यति। जुगोध। इति दुर्गादासः॥

गुधेरः, त्रि, (गुध्यति सर्व्वतो वेष्टयति वेष्टनेन रक्षतीत्यर्थः इति। गुधय वेष्टने "मुलेरादयः।" उणां। १। ६१। इति एरक्।) रक्षकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

गुन्दलः, पुं, (गुमिति मधुरमस्फुटशब्दं कारयन् दल्यते मर्द्दतेऽसौ। दल्+णिच्+कर्म्मणि अच्।) मर्द्दलशब्दः। इति हेमचन्द्रः। ६। ४४॥

गुन्द्रः, पुं, (गुदि+अच्।) शरत्वणम्। इत्यमरः। २। ४। १६२॥ तृणविशेषः। गोंदपटेर इति देशान्तरीयभाषा। तत्पर्य्यायः। पटरकः २ अच्छः ३ शृङ्गवेराङ्गमूलकः ४। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। हिमत्वम्। पित्तरक्तमूत्रकृच्छ्रनाशित्वम्। स्तन्यशुक्ररजोमूत्रशोधनत्वञ्च। इति भावप्रकाशः॥

("गुन्द्रान् दग्ध्वा कृतं भस्म हरितालं मनःशिला।
उपदंशविसर्पाणामेतच्छान्तिकरं परम्॥"
इति सुश्रुते चिकित्सितस्थाने १९ अध्याये॥)

गुन्द्रमूला, स्त्री, (गुन्द्रस्य मूलमिव मूलमस्य।) एरकातृणम्। इति भावप्रकाशः॥

गुन्द्रा, स्त्री, (गुन्द्र+टाप्।) भद्रमुस्तकः। प्रियङ्गुवृक्षः। इत्यमरः। २। ४। १६०॥ गवेधुका। इति रत्नमाला॥ एरका। इति भावप्रकाशः॥

("वैक्रान्तरारणिकवूकटषाश्मभेद-
गोकण्ठकेतकटसहाचरवाणकाशाः।
वृक्षादनीनलकुशद्वयगुण्ठगुन्द्रा
भल्लूकमोरटकुरण्टकरम्भपार्थाः॥"
इति वाभटे सूत्रस्थाने १५ अध्याये॥

पित्तसंशमनीयवर्गान्तर्गतौषधिविशेषः। यथा। "चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठा पयस्याविदारीशतावरीगुन्द्राशैवालकह्लारकुमुदोत्पलकदलीकन्दलीदूर्व्वामूर्व्वाप्रभृतीनि काकोल्यादिन्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्गः॥" इति सुश्रुते सूत्रस्थाने ३९ अध्याये॥)

(गङ्गा। यथा काशीखण्डे। २९। ५४।
"ग्रहपीड़ाहरा गुन्द्रा गरघ्नी गानवत्सला॥")

गुन्द्रालः, पुं, (गुन्द्रं नीड़निर्म्माणार्थं तृणादिकं आलाति आदत्ते इति। आ+ला+कः।) जीवञ्जीवपक्षी। इति हेमचन्द्रः। ४। ४०६॥ गुन्द्रालोऽपि पाठः॥

गुन्फ, श ग्रन्थे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) पञ्चमस्वरी। श, गुम्फति मालां मालिकः। जुगुम्फ। इति दुर्गादासः॥

गुप, ज रक्षे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-वेट्।) आयन्तत्वादुभयपदमिति बोपदेवः। गोपायति गोपायते। अरे तु आयस्याप्राप्तिपक्षे परस्मैपदमेव। अगोपीत्। जुगोप गोरूपधरामिवोर्व्वीमिति रघुः॥ ज, गोपिष्यति गोप्स्यति। इति दुर्गादासः॥

गुप, क भासि। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गोपयति। भासि दीप्तौ। इति दुर्गादासः॥

गुप, ङ गोपनकुत्सयोः। इति कविकल्पद्रुमः॥ (भ्वां आत्मं-सकं-सेट्।) गोपनमपह्नवः। ङ, कङ्कणभानतृकारश्च किं गोपसे। अत्र त्वादयो न स्युरिति रमानाथः। कुत्सा। निन्दा। सा जुगुप्सां प्रचक्रेऽस्तन्। इति भट्टिः। इति दुर्गा-दासः॥

गुप, य इर् व्याकुलत्वे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं सकञ्च-सेट्।) व्याकुलत्वं व्याकुलीभावस्तत्करणञ्च। य, धीरो न गुप्यति महत्यपि कार्य्यजाते। इति हलायुधः। गुप्यति गा वृष्टिः। व्याकुलीकरोतीत्यर्थः। इति चतुर्भुजः। इर्, अगुपत् अगोपीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

गुपिलः, पुं, (गोपायति प्रजाजनानिति। गुप् रक्षणे+"गुपादिभ्यः कित्।" उणां। १। ५६। इति इलच् किच्च।) राजा। इत्युणादिकोषः॥

गुप्तं, त्रि, (गुप्यते स्म। गुप्+कर्म्मणि क्तः।) कृतरक्षणम्। तत्पर्य्यायः। त्रातम् २ त्राणम् ३ रक्षितम् ४ अवितम् ५ गोपायितम् ६। (यथा, महाभारते। १। १। १८८।
"यदाश्रौषं व्यूहमभेद्यमन्यै-
र्भारद्वाजेनात्तशस्त्रेण गुप्तम्॥")
कृतगोपनम्। तत्पर्य्यायः। गूढ़म् २। इत्यमरः। ३। १। १०६। (यथाह वशिष्ठः।
"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः।
वाग्गुप्तिकार्य्याणि तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये॥"
"हेम्नो भस्मकमभ्रकं द्विगुणितं लौहाख्ययः पारदाश्चत्वारो नियतस्तु वङ्गयुगलश्चैकीकृतं मर्द्दयेत्। मुक्ता विद्रुमयो रसेन समता गोक्षुरवासेक्षुणा सर्व्वं वन्यकरीषकेण सुदृढ़ं गुप्तं पचेत् सप्तधा॥" इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाधिकारे॥) सङ्गतम्। इति शब्दरत्नावली॥ वैश्यशूद्राणां पद्धतिविशेषे पुं। यथा, उद्वाहतत्त्वम्॥ "गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः।"

गुप्तगतिः, पुं, (गुप्ता संवृता अन्यैरलक्षिता गतिर्गमनं चेष्टादिर्वा यस्य।) चरः। इति शब्दरत्नावली॥

गुप्तचरः, पुं, (गुप्तः योगेनात्मसंवृतः सन् स्वयं विष्णुरपि सर्व्वैश्वर्य्यमाच्छाद्य नररूपेण चरतीत्यर्थः।) बलदेवः। इति त्रिकाण्डशेषः॥ (कर्म्मधारयसमासे तु राज्ञां गूढ़चरः। गुप्तचरो यस्य इति विग्रहे राजानमेव बोधयति॥)

गुप्तस्नेहः, पुं, (गुप्तः गूढ़भावेन स्थितः स्नेहः तैलादिरसो यत्र।) अङ्कोटवृक्षः। इति राजनिर्घण्टः॥

गुप्ता, स्त्री, (गुप्त+टाप्।) कपिकच्छुः। इति राजनिर्घण्टः॥ परकीयान्तर्गतनायिकाभेदः। तस्या लक्षणम्। मैथुनगोपनम्। सा च त्रिधा। वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वृत्तवर्त्तिष्यमाणसुरतगोपना ३। इति रसमञ्जरी॥

गुप्तिः, स्त्री, (गुप्+अधिकरणभावकरणादिषु यथायथं क्तिन्।) अवकरस्थानम्। कारागारम्। (यथा, माघे। ११। ६०।
"चिरमतिरसलौल्याद्बन्धनं लम्भितानां
पुनरयमुदयाय प्राप्य धाम स्वमेव।
दलितदलकपाटः षट्पदानां सरोजे
सरभस इव गुप्तिस्फोटमर्कः करोति॥")
रक्षणम्। इति मेदिनी। ते। १६॥ (यथा, मनुः। १। ९४।
"तं हि स्वयम्भुः स्वादास्यात्तपस्तप्त्वादितोऽसृजत्।
हव्यकव्याभिवाह्याय सर्व्वस्यास्य च गुप्तये॥")
भूगर्त्तः। यमः। इति हेमचन्द्रः॥ गर्त्तार्थे क्षितिरुत्खननम्। नौकाच्छिद्रम्। इत्यमरटीकायां भरतः। गोपनम्। इति तट्टीकासारसुन्दरी॥ (यथा, साहित्यदर्पणे। ३। १५५।
"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था॥"
सम्बरणम्। यथा, कुमारे। ६। ३८।
"हृष्यन्मणिशिलासालं गुप्तावपि मनोहरम्॥"
ग्रहणीयमन्त्रसंस्कारविशेषः। यथा, तन्त्रसारधृतगौतमीये।
"जननं जीवनं पश्चात् ताड़नं बोधनं तथा।
तथाभिषेको विमलीकरणाप्यायने पुनः।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंक्रियाः॥")

गुफ, प श ग्रन्थे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) पञ्चमस्वरी। प श, गुम्फति मालां मालिकः। जुगोफ। इति दुर्गादासः॥

गुफितः, त्रि, (गुफ्+कर्म्मणि क्तः।) गुम्फितः। ग्रथितः। इत्यमरटीका॥

गुम्फः, पुं, (गुम्फ+घञ्।) ग्रन्थनम्। (यथा, रावणकृतशिवताण्डवे। १३।
"निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरम्॥"
तथाच आर्य्यासप्तशत्याम्। ६०६।
"सततमरुणितसुखे सखि! निगिरन्ती गिरां
गुम्फम्॥")
बाहोरलङ्कारः। इति मेदिनी। फे। २। श्मश्रु। इति शब्दरत्नावली॥ गोंफ इति भाषा॥

गुम्फितः, त्रि, (गुम्फ+कर्म्मणि क्तः।) ग्रथितः। इत्यमरटीकायां रायमुकुटः॥ (यदुक्तम्।
"प्रयत्नगुम्फितामाला यतस्तेन निराकृता॥")